दिनाङ्क :-26.11.2024

प्रात: - 06:55

<u>प्रधानमन्त्री-सहकारितासम्मेलन</u>

प्रधानमन्त्री नरेन्द्र मोदी ह्य: सबलं प्रतिपादितवान् यत् भारतं स्व-भविष्यस्य विकासे सहकारिताया: बृहत्तमां भूमिकां पश्यति इति। प्रधानमन्त्री नरेन्द्र मोदी नवदिल्ल्या: भारतमण्डप-स्थाने आई.सी.ए. वैश्विक-सहकारिता सम्मेलनस्य उद्घाटनं कृतवान्। उक्तवान् च यत्।

अन्ताराष्ट्रिय-सहकारी-संयुते: त्रिंशदधिक-एक-शत-तम-वर्षस्य इति-वृत्ते प्रथमं वारं वैश्विक-सहकारि-सम्मेलनस्य सामान्य-सभाया: च आयोजनं भारते क्रियते। अत्र अवसरे श्रीमोदी पञ्च-विंशति-अधिक-द्विसहस्र-तमे अन्ताराष्ट्रिय-सहकारिता वर्षे स्मारक-प्रैष्य-पत्रम् अपि विमोचितवान्। एतस्मिन् सम्मेलने भूटान-देशस्य प्रधानमन्त्री दाशो-शेरिंग-तोबगे इत्येष: फिजी-देशस्य च उप-प्रधानमन्त्री मनोआ-कामिका-मिका-इत्येष: अपि सम्मिलितौ भवत:। इत: पूर्वं केन्द्रीय-गृहमन्त्री-अमितशाह: समारोहं सम्बोधितवान्।

<u>संविधान</u>

प्रशासनेन भारतस्य संविधानस्य स्वी-करणस्य पञ्च-सप्तति-तम वर्षस्य स्मणार्थं वर्षपर्यन्तं उत्सवस्य घोषणा कृता। या हि अद्य आरभ्य अग्रिमे वर्षे नवम्बरमासस्य षड्-विंशति दिनाङ्क पर्यन्तं सम्पूर्णे देशे उत्सव: अयं प्रचलिष्यति। अवधेयं वर्तते नवचत्वारिंशत् अधिक-नवदश-शत-तमे वर्षे नवम्बरमासस्य षड्विंशति दिनाङ्के भारतस्य संविधान-सभा संविधानम् अङ्गीकृतवती। यत् पञ्चाशत् अधिक नवदशशततमे वर्षे जनवरीमासस्य षड्विंशे दिनाङ्के प्रवृतम् अभवत्।

उत्सवस्य विषये प्रवदन् संसदीय कार्य मन्त्री किरेन् रिजिजु: ह्यः नवदिल्ल्यां वार्ताहराणां सम्मेलने उक्तवान् यत् सम्विधानसदनस्य केन्द्रीयभवने भव्यकार्यक्रमस्य आयोजनं भविष्यति यत्र राष्ट्रपते: द्रौपदी मुर्मू वर्याया : सम्बोधनं भविष्यति संसदः द्वयोः सदनयोः सदस्याः च सम्मिलिताः भविष्यन्ति । विधिन्यायमन्त्री अर्जुनराममेघवालः अवदत् यत्, वर्षव्यापी उत्सवः "हमारा सम्विधान, हमारा स्वाभिमान" इति अभियानस्य अन्तर्गतं भविष्यति।

## जयशंकरः

विदेशमन्त्री डॉ. एस.जयशंकरः पश्चिम एशियायाः स्थितिविषये चिन्ताम् अभिव्यक्तवान् यत् भारतं आतङ्कवादस्य बन्धकग्रहणस्य च निन्दां करोति। इटलीदेशस्य रोमनगरे एमईडी इत्यस्मिन् भूमध्यसागरीयसंवादसम्मेलने डॉ. जयशङ्करः वदति स्म। विदेशमन्त्री उक्तवान् यत्, भारतं इजरायल-इरान्-देशाभ्याम सह उच्चतमस्तरयोः नियमितरूपेण सम्पर्कं कृत्वा संचारवर्धनं कृतवान् अस्ति। युक्रेन-सङ्घर्षस्य विषये डॉ. जयशङ्करः भारतस्य निरन्तरं मतं बोधयन् यत् अस्मिन् युगे विवादानाम् समाधानं युद्धद्वारा कर्तुं न शक्यते इति, संवाद-कूटनीतियोः आह्वानं च कृतवान्। डॉ. जयशङ्करः इटलीदेशस्य त्रिदिवसीययात्रायाः कृते रविवासरे रोमनगरं प्राप्तवान्।

## प्रसार भारती

प्रसार भारती, RailTel, PlayboxTV इत्यनेन सहकार्यं कृत्वा RailWire Broadband इत्यत्र Freedom Plan इत्यस्य आरम्भः कृतः। प्रसारभारत्याः मुख्यकार्यकारी अधिकारी गौरवद्विवेदी, रेलटेल् इत्यस्य अध्यक्षः प्रबन्धनिदेशकः च संजयकुमारः ह्यः नवदिल्ल्याम् एकस्मिन् कार्यक्रमे योजनायाः अनावरणं कृतवन्तौ। Freedom Plan इति OTTगृह-अन्तर्जाल-योजना अस्ति, या RailTel इत्यस्य समग्र-गृह-अन्तर्जाल-सेवा, RailWire इत्यनेन प्रदत्ता अस्ति ।

अत्र जनसामान्यं प्रति समुचित मूल्येन उच्चगति-अन्तर्जालं प्रददाति तथा च प्रसारभारत्याः OTT-मञ्चः WAVES इति अन्तर्भवति । अस्मिन् अवसरे प्रवदन् श्रीद्विवेदी अवदत् यत् एतस्य सहकार्यस्य उद्देश्यं डिजिटलसङ्गतिं पुनः परिभाषितुं वर्तते।

इति वार्ताः